AECSK2.4

Reg. No. [ ][ ][ ][ ][ ][ ][ ][ ]

**II Semester B.Sc./BSc.(FAD) Degree Examination, October - 2022**

**SANSKRIT**

**Vigraha, Grammar, Translation & Comprecherision**

**Paper : II**

**(CBCS Scheme Freshers NEP 2021-2022)**

**Time : 2½ Hours** **Maximum Marks :60**

**Instructions to Candidates:**
1) Answer in Sanskrit/Kannada/English
2) Questions I,V,VI,VII should be answered in sanskrit only

**I.** समीचीनं उत्तरं चित्वा लिखत। (10×1=10)

Select and write the correct answer.

ಸರಿಯಾದ ಉತ್ತರವನ್ನು ಆರಿಸಿ ಬರೆಯಿರಿ.

LIBRARY
VIJAYA COLLEGE
Jayanagar IV Block
Bangalore-560 011

1) बृहत्कथायाः रचयिता कः?

a) क्षेमेन्द्रः b) भोजः c) गुणाढ्यः d) कालिदासः

2) अमरशक्तेः कति पुत्राः आसन्?

a) चत्वारः b) त्रयः c) पुत्राः d) द्वे

3) हिरण्यगर्भः कः?

a) राजहंसः b) काकः c) मयूरः d) मर्कटः

4) शुकः कं प्रति कथां कथयति?

a) हिरण्यवर्णम् b) नीलवर्णम् c) चित्रवर्णम् d) पिङ्गवर्णम्

5) दीर्घमुखः कस्मिन् अरण्ये चरन्नवलोकितः?

a) दण्धे b) मलये c) हिमालये d) किष्किन्धायां

6) अण्डानि कैः पतितानि?

a) मण्डूकैः b) पक्षिभिः c) वानरैः d) मयूरैः

[P.T.O.



Be AatmaNirbhar. Use Kaagaz

7) पयः पानं केषां केवलं विषवर्धनम्?

a) मशकानां b) भुजङ्गानां c) शशकानां d) शुनकानां

8) विलासो नाम रजकः कुत्र आसीत्?

a) काशीपुरे b) उज्जयिन्यां c) पाटलीपुत्रे d) हस्तिनापुरे

9) पक्षिराजः कः?

a) काकः b) मयूरः c) राजहंसः d) गरुडः

10) रजकेन गर्दभः केन प्रच्छादितः?

a) व्याघ्रचर्मणा b) सिंहचर्मणा c) मेषचर्मणा d) महिषचर्मणा

**II. द्वयोः प्रश्नयोः उत्तरं लिखत।** (2×8=16)

**Answer any Two questions.**

ಎರಡು ಪ್ರಶ್ನೆಗಳಿಗೆ ಉತ್ತರಿಸಿ.

1) **संस्कृत कथा साहित्यस्य उगमविकासौ अधिकृत्य प्रबन्धं लिखत।**

Write an Essay on Origin & development of Kathe Sahitya

ಸಂಸ್ಕೃತ ಕಥಾಸಾಹಿತ್ಯದ ಉಗಮ-ವಿಕಾಸಗಳನ್ನು ಕುರಿತು ಪ್ರಬಂಧವನ್ನು ಬರೆಯಿರಿ.

2) हितोपदेशस्य विग्रहतन्त्रे दीर्घमुखेनोक्तं कथां वर्णयत।

Explain the importance of the story narrated by deerghamukha with reference to hitopadesha.

ಹಿತೋಪದೇಶದ ವಿಗ್ರಹ ವಿಭಾಗದಲ್ಲಿ ಬರುವ ದೀರ್ಘಮುಖನು ಹೇಳಿದ ಕಥೆಯನ್ನು ವರ್ಣಿಸಿರಿ.

3) **हितोपदेशं अधिकृत्य प्रबन्धंम् आरचयत।**

Write an Essay on Hitopadesha

ಹಿತೋಪದೇಶವನ್ನು ಕುರಿತು ಪ್ರಬಂಧವನ್ನು ರಚಿಸಿ.

**III. एकस्य गद्यभागस्य अनुवादं कुरुत।** (1×6=6)

Translate any One of the Prose.

ಒಂದು ಗದ್ಯಭಾಗವನ್ನು ಅನುವಾದ ಮಾಡಿ.

1) **अस्ति जम्बुद्विपे विन्ध्यो नाम गिरिः। तत्र चित्रवर्णो नाम मयुरः पक्षिराजो निवसति। तस्यानुच्चरै श्ररद्भिपक्षिभिरहं दग्धारण्यमध्ये चरन्नवलोकितः पृष्टश्च-कस्त्वम्। कुतः समागतोऽसि। तदा मयोक्तम्- कर्पुरद्विपस्य राजचक्रवर्तिनो हिरण्यगर्भस्य राजहंसस्यानुचरोऽहम्। कौतुकाद्देशान्तरं द्रष्टुमागतोऽस्मि। एतच्छ्रुत्वा पक्षिभिरुक्तम्-अनयोर्देशयोः को देशो भद्रतरो राजा च।, मयोक्तम्-, आः किमेवमुच्यते। महदन्तरम्। यतः कर्पूरद्वीपः स्वर्ग इव राजहंसश्च द्वितीयः स्वर्गपतिः।**

Jayanagar IV Block
Bangalore-560 011



Be AatmaNirbhar. Use Kaagaz

2) अस्त्युज्जयिनीवर्त्मनि प्रान्तरे महान् पिप्पलवृक्षः। तत्र हंस काकौ निवसतः। कदाचित् ग्रीष्मसमये परिश्रान्तः कश्चित्पथिकस्तत्र तरुतले धनुः काण्डं संनिधाय सुप्तः। क्षणान्तरे तन्मुखाद् वृक्षच्छाया गता। ततः सूर्यतेजसा तन्मुखं व्याप्तमवलोक्य कृपया तद्वृक्षस्थितेन हंसेन पक्षौ प्रसार्य पुनस्तन्मुखे छाया कृता। ततो निर्भरनिद्रासुखिना तेन पथिकेन मुखव्यादानं कृतम्। अथ परसुखमसहिष्णुः स्वभावदौर्जन्येन स काकस्तस्य मुखे पुरीषोत्सर्गं कृत्वा पलायितः। ततो यावदसौ पान्थ उत्थायोर्ध्वं निरीक्षते तावत्तेनावलोकितो हंसः काण्डेन हत्वा व्यापादितः।

IV. त्रयाणां वाक्यांश ससन्दर्भं विवृणुत। (3×3=9)

Explain with reference to context any Three Sentences

ಮೂರು ವಾಕ್ಯಗಳನ್ನು ಸಂದರ್ಭಸಹಿತ ವಿವರಿಸಿ.

1) अस्ति महती वार्ता।
2) अन्तरं नैव जानाति स तिरश्चीस्तेर्जनीमिः।
3) मयात्र प्रतिकारः कर्तव्यः।
4) दशनान्तो हस्तिनीतां बन्धनं स्यान्महोदधेः।
5) अकालकुसुमानीव भयं संजनयन्ति हि।

VIJAYA COLLEGE
Jayanagar 4T Block
Bangalore-560 011

V. संस्कृतभाषया उत्तरं लिखत।

अ) पदानां सन्धिं विभज्य सन्धिनाम लिखत। (5×1=5)

1) अत्युत्तमः 2) पुस्तकालयः
3) देवैश्वर्यम् 4) गायकः
5) महौषधिः 6) गजेन्द्र
7) कोऽपि 8) शशाङ्कः

आ) चतुर्णां पदानां प्रत्येकं वाक्य रचयत। (4×1=4)

1) परितः 2) अलं
3) स्वाहा 4) बहिः
5) पश्चात् 6) निपुणः
7) नमः 8) सह

VI. अपठित गद्यभागस्य भाषान्तरं कुरुत। (05)

यस्मिन् देशे वयं जन्मधारणं कुर्मः स हि अस्मांक देशः जन्मभूमिः वा कथ्यते। जननी इव जन्मभूमिः अपि पूज्या आदरणीय च भवति। अस्याः यशः सर्वेषां देशवासिनां यशः भवति। अस्याः गौरवेण एव देशवासिनां गौरवम् भवति देशभक्तिः सर्वासु भक्तिषु श्रेष्ठा कथ्यते।

[P.T.O.


Be AatmaNirbhar. Use Kaagaz

VII. अधोलिखित-गद्यांशं पठित्वा प्रश्नान् उत्तरत। (5×1=5)

इह जगति सर्वाधिकं मूल्यवत् वस्तुः अस्ति चेत् तर्हि समयः एव। मानव जीवनस्य प्रत्येकं क्षणं अतीव महत्वपूर्णं अस्ति। यस्य आयुषः यावत् अंशः निरर्थकं गतः स गतः एव। नष्टः कालः केनापि प्रयत्नेन पुनः प्राप्तुं न शक्यते। धनादिकवस्तूनि तु विनष्टानि तु पुनः प्रयत्नेन लब्धुं शक्यन्ते। अनेके जनाः तु दुर्व्यसने, द्यूते, विवादे वृथा भ्रमणे निद्रायां च समस्तं समयं यापयन्ति। शनैः शनैः काले व्यर्थं गते सति ईदृशाः जनाः पश्चात् नैराश्यं यान्ति। सफलतायाः समुन्नतेः मूलमन्त्रम् अस्ति- प्रत्येकं क्षणस्य सदुपयोगः। प्रकृतिः अपि समयस्य सदुपयोगम् एव शिक्षयति। अतः आत्मविकासाय सर्वथा समयस्य सदुपयोगः कर्तव्यः। उक्तं च- 'क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम्'।

प्रश्नाः-

1) कस्य सदुपयोगं प्रकृतिः शिक्षयति?

2) मानवजीवनस्य किं महत्वपूर्णं अस्ति?

3) जगति सर्वाधिकं मूल्यवत् वस्तु किम्

4) क्षिप्रमक्रियमाणस्य रसं कः पिबति?

5) कानि वस्तूनि विनष्टं चेत् पुनः प्रयत्नेन लब्धुं शक्यन्ते?

LIBRARY
VIJAYA COLLEGE
Jayanagar IV Block
Bangalore-560 011


Be AatmaNirbhar. Use Kaagaz